अन्नंभट्टो नाम कश्चन विपश्चित् दुश्चरतपश्चरणाद्विगुणितबुद्धिवैशद्यैः दूरीभवदवद्यैः [illegible]चरणपश्यच्चरणप्रधानैः प्राचीनैर्बहुधा लक्षणप्रमाणाभ्यां लक्षितमपि पदार्थसार्थं व्युत्पित्स्वनुजिघृक्षया परिमितपदनिबन्धेन तर्कसङ्ग्रहनामकेन केनचित्प्रबन्धेन संगृह्य स्वयमेव श्रुतार्थधारणनैपुणीविधुराणां मितमतीनां हिताय तमेव प्रबन्धं व्याचिकीर्षुः प्रारीप्सितपरिसमाप्तिपरिबन्धिप्रत्यूहसमूह-

व्यपोहनाय विवक्षितार्थविशदावबोधनसमर्थगंभीरभारती-
गुम्भनचातुरीस्थिरीकरणाय च विरचितं परमेश्वरसरस्वती-
गुरुप्रणतिरूपं मंगलं स्वप्रारीप्सितफलश्च स्वस्वग्रन्थयोर-
शिष्टत्वग्रन्थत्वशंकानिराकरणाय संकीर्तयंश्चिकीर्षितं प्रति-
जानीते ॥ विश्वेश्वरमित्यादिना ॥

टीकां कुर्वे इत्यन्वयः ॥

End:

तथापि तदविरोधेन तस्याप्युपपादकं स्मृत्यन्तरमस्तीति
तत्प्रतिपन्नार्थस्याप्यस्वारस्यमन्तरेणैवोपपादनाय तदुप-
पादकतत्तद्वचनोपादनमिति मन्तव्यम् । ज्ञानद्वारैवेत्येवका-
रव्यावर्त्यं दर्शयति । नन्विति । उक्तमर्थमुपसंहरति ।
तस्मादिति ॥

अस्त्वत्र बहु वक्तव्यमधिकोक्तिश्च वर्तताम् ।
अथाप्यस्ति विशेषोऽपीत्यनुगृह्णन्त्वमत्सराः ॥

व्युत्पित्सूनां हितायेयं वेङ्कटार्येण निर्मिता ।
तनोतु सुधियां प्रीतिं तर्कसंग्रहटिप्पणी ॥

Colophon:

इति श्रीवाधूलकुलतिलकश्रीशैलदेशिकतनयस्य श्रीवेङ्कटगुरोः कृतिषु
तत्त्वार्थदीपिकानाम तर्कसंग्रहटिप्पणी समाप्ता ॥

Subject: Tarkasangrahaṭippaṇi otherwise known as Tattvārthadīpikā.

Remarks:—The Ms. is in a fairly good condition.

Veṅkaṭaguru, the author of this commentary on Annam-

bhaṭṭa, is the son and pupil of Śrīnivāsa. He belongs to the family called Vādhūla.

॥ तर्कसङ्ग्रहदीपिकाटीका ॥

6505. TARKASAṄGRAHADĪPIKĀṬĪKĀ.

Not noticed by Burnell Ms. No. 14461.

Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—8. Lines—10 — 12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—?. Incomplete. Not printed.

Beginning:

नौमि श्रीशं सिंहमुखं प्रह्लादाभीष्टदं वरम् ।
स मे ददातु सज्ज्ञानं प्रसादं च गुरोर्वरम् ॥

गुरुराजपदं स्तौमि शुकवञ्छिक्षितो नरः ।
तर्कसङ्ग्रहटीकां वै व्याख्यास्ये तत्कृपावलात् ॥

बालबोधकतर्कसङ्ग्रहं व्याचिख्यासुरन्नंभट्टः स्वचिकीर्षितकर्मसमाप्तिफलकमिष्टदेवतानमनं विधाय वाचालत्वापादिकां सकलवागभिमानिनीं सरस्वतीं तत्त्वोपदेशकं गुरुवचनमनुशिष्यावधानफलिकां चिकीर्षितप्रतिज्ञां विधत्ते विश्वेश्वरमिति । अहं तर्कसङ्ग्रहदीपिकां टीकां कुर्वे इति योजना । तर्क्यंते प्रतिपाद्यंते कणादशास्त्र इति कर्मव्युत्पत्त्या तर्कशब्देन सप्तपदार्थाः गृह्यन्ते । ते सङ्गृह्यन्ते संक्षिप्ततया प्रतिपाद्यन्ते अस्मिन्निति...व्युत्पत्त्या तर्कसङ्ग्रहसंज्ञो ग्रन्थविशेषः तस्य दीपिकां प्रकाशजनिकामशेषतदर्थज्ञापिकामिति यावत् । कुर्वे करोमि ।

End:

अन्यमर्थं दर्शयति । कृत्वेत्यर्थं इति मूले तर्क इत्यनेन सप्तपदार्थविषया इति....वितम् । बालानामित्यनेन अधिकार......

Subject: Tarkasaṅgrahadīpikāṭīkā.

Remarks:—The Ms. is in a fairly good condition.

The author of this ṭīkā on the Dīpikā is not known.

॥ तर्कसङ्ग्रहव्याख्या—निरुक्तिः ॥

6506. TARKASAṄGRAHAVYĀKHYĀ—NIRUKTIḤ.

S. S. Collection No. 173.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—43. Lines—6 to a Page. Script—Telugu. No. of Granthas—750. Author—Paṭṭābhirāma. Complete. Printed.

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः क्रियते मया ॥

* *

इह खलु प्रारीप्सितप्रकरणसमाप्तिप्रत्यर्थिप्रत्यूहव्यूह-विध्वंसनाय ग्रन्थारम्भे मङ्गलमनुतिष्ठन्ति शिष्टाः ।

End:

इति सर्वं समञ्जसम् ॥

अयुक्तमपि शास्त्रज्ञा यदुक्तं पुनरुक्तिमत् ।
बालबोधनिमित्तार्थं क्षम्यतां तदशेषतः ॥

Colophon:

श्रीमते कवितार्किकसिंहाय नमः । श्रीवृषशैलाधिपतये नमः ॥

रायपुरनिवासिना कृष्णसूरिणा लिखितम् ॥

करकृत + सन्तः ॥

Subject: Tarkasaṅgrahavyākhyā, Nirukti.

Remarks:—The Ms. is in a fairly good condition. The author of this work is the same as the author of Mañjūṣā, a commentary on Muktāvali. He was the pupil of the author of Prabhā—Rayanarasimha of Kāñcī. The other works contained herein are:—

1. Another copy of the same work.
2. Nyāyabodhinī.

The work has been published by the Śrī Bālamanoramā Press, Madras.

॥ तर्कसङ्ग्रहव्याख्या—निरुक्तिः ॥

6507. TARKASAṄGRAHAVYĀKHYĀ—NIRUKTIḤ.

S. S. Collection No. 174.

Substance—Palm leaf. Size—$15\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—27. Lines—6 or 7 to a page. Script—Telugu. No. of Granthas—750. Author—Paṭṭābhirāma. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6506.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given

'सुब्रह्मण्यशास्त्रिणा लिखितम् ॥'

For the other works contained herein see Remarks under No. 6506.

॥ तर्कसङ्ग्रहव्याख्या—न्यायबोधिनी ॥

6508. TARKASAṄGRAHAVYĀKHYĀ—NYĀYABODHINĪ.

S. S. Collection No. 176.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{3}{8}$ inches. Leaves—14. Lines 6 or 7 to a page. Script—Telugu. No. of Granthas—550. Author—Govardhanasudhī. Complete Printed.

Beginning:

अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥

End:

अतः अनेकान्तविशेषणम् ॥

Colophon:

इति शब्दपरिच्छेदः ।

Subject: Nyāyabodhinī.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see Remarks under No. 6506.

Govardhana, the author of this work is probably the same as the author of Tarkabhāṣāprakāśa. vide. 6335.

The work has been published by the Śrī Bālamanorama Press, Madras.

॥ तर्कसङ्ग्रहव्याख्या ॥

6509. TARKASANGRAHAVYĀKHYĀ.

Burnell's Catalogue No. 10829. Page 122. Left column. Substance—Palm leaf. Size— 16⅝ × 1⅝ inches. Leaves—5. Lines—9 to a Page. Script—Grantha. No. of Granthas—125. Author—? Incomplete. Not printed.

Beginning:

प्रमायाः करणत्वं प्रमाणत्वं । करणत्वं किं नाम ।
व्यापारवत्त्वे सति असाधारणकारणत्वं करणत्वं ॥

End:

तदाश्रयत्वे सति जातिमत्कारणत्वं यत् तदसमवायि-
कारणत्वं । * *
स्वस्य संयोगस्य कार्यं घटादि । तस्य समवायिकार.... ।

Colophon: Nil.

Subject: A commentary on the Tarkasangraha, beginning from the definition of Pramāṇa and going up to the definition of Asamavāyikāraṇa,

Remarks:—The Ms. is in decaying condition.

Dr. Burnell calls this 'Tarkasangraha having notes mixed up in the text.'

॥ तार्किकरक्षा ॥

6510. TĀRKIKARAKṢĀ.

Not noticed by Burnell Ms. No. 15824 d.

Substance—Palm leaf. Size—18½ × ⅞ inches. Leaves-

15 (142-156). Lines—4 or 5 to a page. Script—Grantha. No. of Granthas—150. Author—Varadarāja. Complete Printed.

Beginning:

चित्सदानन्दसन्मात्रं परमानन्दरूपिणम् ।
निष्कलं निर्मितं साक्षाद्विनायकमुपैमि तम् ॥

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ॥

निःश्रेयसफलं प्राहुर्येषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥

तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनम् ।
प्रमाश्रयो वा तद्व्याप्तो यथार्थानुभवः प्रमा ॥

End:

विक्षेपो प्रतिभाज्ञानं हेत्वन्तरमुपेक्षणम् ।
साध्यान्तरं मतानुज्ञावादेऽनुद्भाव्य संप्रति ॥

...............न्तविरोधाननुभाषणम् ।
पुनरुक्तिर्विपर्यासो वादेषूद्भाव्य सप्तकम् ॥

...............हेत्वाभासो हि कारणम् ।
तथा निरनुयोज्यानुयोज्यानामनुयोगतः ॥

Colophon:

न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः
इयं वरदराजस्य कृतिर्विजयतेतराम् ॥

तार्किकरक्षा समाप्ता ॥

Subject: Tārkikarakṣa.

Remarks:—The Ms. is in a decaying condition. The other works contained herein are

a. Līlāśuka's Kṛṣṇakarṇāmṛta.

b. Kavirākṣasa'sataka.

c. Nalodayā.

Varadarāja is the author of the Tārkikarakṣā, or Tārkikakārikā a Nyāya work in 160 Kārikas and a commentary thereon, called the Tārkikarakṣāsārasaṅgraha. Varadarāja is later than even Udayanācārya, but earlier than the author of the Sarvadarśanasaṅgraha. He flourished about 1150 A. D. He has written 2 commentaries on Udayana—The Bodinī on his Kusumañjalī and another on his Kiraṇāvali.

The work has been edited by Vindhyeśvarī Prasād Dube (Printed at Benares 1908) with English Introduction and notes by A. Venis.

|| तार्किकरक्षासारसङ्ग्रहः ||

6511. TĀRKIKARAKṢĀSĀRASAṄGRAHAḤ.

Burnell's Catalogue No. 10918. Page 120. Left column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—91. Lines—7 to a Page. Script—Grantha. No. of Granthas—2002. Author—Varadarāja. Incomplete. Up to Paricceheda. Not printed.

Beginning;

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ॥

प्रा ोप्सितस्य ग्रन्थस्य प्रेक्षावदुपादित्साप्रयोजिकाम-भिमतफलसाधनतामाभिधाय श्रोतृबुद्धिमनुकूलयन् वर्ति-ष्यमाणमग्रे दर्शयति

निःश्रेयसफलं प्राहुरेषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥

येषां प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां निर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वतोऽवधारणमात्यन्तिकदुःखनिवृत्तिलक्षणनिःश्रेयसम् + त इदानीं पदार्था लक्ष्यन्ते समानासमानजातीयव्यव-च्छेदधर्मवत्तया प्रदर्श्यन्त इत्यर्थः ।

End:

उद्भावनीयं कथाविच्छेदश्चेत्याह ॥
वेदे कथावसानस्य हेत्वाभासो हि कारणम् ।
तथा निरनुयोज्यानाम्‌ योग इति द्वयम् ॥

केचित्तु अत्र सिद्धान्तविरुद्धः पञ्चावयवोपपन्न इति विशेषणोपादानादपसिद्धान्तावयवन्‌ नमधिकञ्च कथा-व्यवच्छेदनिमित्तमित्याचक्षत इति ।

Colophon: Nil.

Subject: Tārkikarakṣāvyākhyā; Sārasaṅgraha.

Remarks:—The Ms. is in decaying condition. There are in the library 8 more Mss. of this work. They are here described in a tabular form below.

TĀRKĪKARAKṢĀSĀRASAṄGRAHA.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script	Complete or otherwise.
6512	B. L. 10919	Palm leaf.	$15\frac{1}{2} \times 1\frac{1}{4}$	98	7	Devanāgarī.	Incomplete: wants end.
6513	,, 10920	,,	$14\frac{1}{2} \times 1\frac{1}{2}$	87 (126-212)	8	Grantha.	,, ,,
6514	,, 10921	,,	$16\frac{1}{4} \times 1\frac{1}{4}$	97 (150-246)	8	,,	,, ,,
6515	,, 10922	,,	$15 \times 1\frac{1}{4}$	64	6 or 7	,,	,, First Paricheda only.
6516	,, 10926	,,	$12\frac{1}{4} \times 1\frac{1}{4}$	34 (1-34)	9 or 10	,,	,, Wants end.
6517	,, 10928	,,	$17\frac{1}{4} \times 1$	79 (3-81)	5	,,	,, Wants beginning.
6518	Ms. No. 15557 Not noticed by Dr. Burnell.	Paper.	$12 \times 8\frac{1}{4}$	19 (21-39)	11	Devanāgarī.	,, ,, ,, & end. Begins with Karma.

TARKĪKARAKṢĀSĀRASAṄGRAHA. (Contd.)

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6519	B. L. 10981a	Palm leaf.	$14\frac{1}{3}\times1\frac{1}{4}$	30	6	Grantha	,, ,, ,, begins with Pramāṇavibhāga & ends with guṇa vibhāga.

DETAILED REMARKS
on the
VARADARĀJĪYA MSS NOTICED IN THE ABOVE TABLE.

6517 Colophon:

न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः ।
इयं वरदराजस्य कृतिर्विजयतेतराम् ॥
इति वरदराजविरचिते + तृतीयः परिच्छेदः ।
आलोक्यदुस्तरगभीरतरान् प्रबन्धान्
वाचस्पतेरुदयनस्य तथापरेषाम् ।
सारो मयात्र समगृह्यत वावदूकैः
नित्यं कथासु विजिगीषुभिरेष धार्यः ॥

There are in the end some loose sheets dealing with Tarka.

6519 There is some Tarka tract at the end of this work. Dr. Burnell has left the whole of this Ms. as an unidentified fragment on p. 121.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6520. TĀRKIKARAKṢĀSĀRASAṄGRAHA—VYĀKHYĀ.

Burnell's Catalogue No. 10928. Page 120. Left column. Substance—Palm leaf. Size—18½ × 1¾ inches. Leaves—130. Lines—10 to a Page. Script—Grantha. No. of

Granthas—3600. Author—Harihara. Complete. Not printed.

Beginning:

अन्योन्यन्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तसुलभ मव्याद्वयमुखं महः ॥
यदुपक्रमं जनुष्मद्वर्गो यदुपक्रममखिलमाम्नायः ।
तमजमनन्तमुपासे वृषाकपायीमनोरमं देवम् ॥
ऐश्वर्यैहावशैर्नित्यं मनोवाग्वादिभिः सुरैः ।
वन्दनीयां भजे देवीं स्वाभीष्टफलसिद्धये ॥
मम गण्डप्पयाचार्यं वन्देयस्य कृपावशात् ।
अपि बालाः प्रगल्भन्ते वैदुष्योत्कर्षशालिनः ॥
...प्रकरणमुदितं गौतममतमनुसृत्य वरदराजेन ।
विवृणोमि हरिहरोऽहं भारद्वाजो नृसिंहसूरिसुतः ॥

इह खलु वरदराजोनाम कश्चिद्विपश्चित् अक्षपादपक्षिलादिभिरनैकथा...लक्षणपरीक्षाभ्यां प्रपञ्चितं पदार्थजातं बालिशानुजिघृक्षया कारिकानिबन्धेन तार्किकरक्षाख्यग्रन्थेन सङ्गृह्य ताः कारिकाः स्वयमेव विवरीतुमारभमाणः प्रारीप्सितग्रन्थस्य परिसमाप्तिपरिपन्थिप्रत्यूहसमूहविघाताय शिष्टाचारपरिप्राप्तमिष्टदेवतानमस्काररूपं मङ्गलं आदौ निबध्नाति प्रथमश्लोकेन ॥ नमामीत्यादिना ॥

End:

किन्तु विजिगूषूणामपि श्लाघ्य इत्याह । लोकस्येति । अपरेषां पक्षिलभूषणादीनामित्यर्थः । साधुवावद्यन्त इति वावदूकाः 'यज जपदशां यङ' इति सूत्रेवदरेनुप्रवशः

कार्यं इति पदकार वाक्यादूक प्रत्यय इति क्षीरस्वामीयम्।
दन्तानां यजज...सिवदाम्' इति कालापोक्तेरूक इति
सर्वानन्दः

Colophon:

इयं हरिहरार्येण भारद्वाजेन यज्वना ।
कृता वरदराजीयव्याख्या सद्भिः परीक्ष्यताम् ॥
यदत्र स्खलितं दृष्टं तत्प्रमृज्य यथार्थतः ।
व्याख्यां विलिख्य तैरेव शोधकैः क्रियतां कृपा ॥
अक्षरं यत्परिभ्रष्टं मात्राहीनन्तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥
करगतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
बिन्दुदुर्लिपिविसर्गवीथिका
श्रृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥

Subject: Tārkikarakṣāsārasaṅgrahavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

Hariharayajvan of Bhāradvājagotra has commented upon the Tārkikarakṣāsārasaṅgraha of Varadarāja. The commentator seems to have been a native of South India.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6521. TĀRKIKARAKṢĀSĀRASAṄGRAHA—VYĀKHYĀ.

Burnell's Catalogue No. 10947. Page 120. Right column.

Substance—Palm leaf. Size—15¾ × 1½ inches. Leaves—217 (6-45+1-172). Lines —7 to a Page. Script—Grantha. No. of Granthas—3600. Author—Harihara. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 6520.

Remarks:—The Ms. is in a fairly good condition. There is one loose leaf containing a subhāṣita verse.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6522. TĀRKIKARAKṢĀSĀRASAṄGRAHA VYĀKHYĀ.

Burnell's Catalogue No. 10924. Page 120. Left column. Substance—Palm leaf. Size—14½ × 1¼ inches. Leaves—162. Lines —7 to a Page. Script—Telugu. No. of Granthas—1134. Author—Hari(Hara)dīkṣita. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6520.

End:

दृष्टान्तमाह ॥ यथेति ॥ तर्कितेऽर्थे प्रमाणमाह । प्रयोगश्चेति । हेतुविशेषणाविशेष्याभ्यां मृतग्रहस्थितस्य च व्यवहारश्चेति... ।

Subject: Tārkikarakṣāsārasaṅgrahavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6523. TĀRKIKARAKṢĀSĀRASAṄGRAHA—VYĀKHYĀ.

Burnell's Catalogue No. 10925. Page 120. Left column. Substance—Palm leaf. Size—14⅓ × 1 inches. Leaves—9. Lines—5 to a page. Script—Grantha. No. of Granthas—200. Author—Hariharadīkṣita. Incomplete. Not printed.

Beginning—Same as No. 6520.

End:

तथा महिषसदृशो गवय इति अनाप्तवाक्यात्प्रवृत्तस्य गवयादीनामपङ्क्तादिग्गवयस्य प्रत्यक्षं प्रत्य...ज्ञानं याद्-च्छिकसंवादु...न विभ्रमः अनाप्तवाक्यात्प्रवृत्तस्य दैवात् ....लाभे... ।

Subject: Tārkikarakṣāsārasaṅgrahavyākhyā

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell has wrongly noticed this Ms. as representing a copy of the Varadarāja's work.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6524. TĀRKIKARAKṢĀSĀRASAṄGRAHA—VYĀKHYĀ.

Burnell's Catalogue No. 10929. Page 120. Left column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—

96 (64-159). Lines—6 to a page. Script—Grantha. No. of Granthas—2000. Author—Harihara. Incomplete. Not printed.

Beginning—Same as No. 6520.

End :

अनुमानसामग्रीसद्भावादनुमानएवान्तर्भवतीत्याह । तदपीति । तद्विज्ञानमित्यर्थः । प्रयोगस्तु इयं सहस्रसङ्ख्याधिकरणत्वयोग्यव्यक्तिसहितव्यक्तिनिष्ठो सहस्रसङ्ख्यात्वात्पूर्वगणितसहस्रसङ्ख्यावदिति अथवा शतसङ्ख्या समवायिकारणत्व..

Subject: Tārkikarakṣāsārasaṅgrahavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ तार्किकरक्षासारसङ्ग्रहव्याख्या ॥

6525. TĀRKIKARAKṢĀSĀRASAṄGRAHA—VYĀKHYĀ.

Burnell's Catalogue No. 10930. Page 120. Left column. Substance—Palm leaf. Size—16 × 1½ inches. Leaves—98 (31, 43, 89, 90, 92, 91 & 94 wanting). Lines—7 to a Page. Script—Grantha. No. of Granthas—1316. Author—Harihara. Incomplete. Not printed.

Beginning—Same as No. 6520.

End:

गुणसाधर्म्यादिकथनप्रस्तावे केचन गुणाः कचित्पाक-

जत्वेन विशेषिताः । तत्र केचिदाहुः अपाकानीते घटादा-
वविनष्ट एव पूर्वरूपादयो...रूपान्तरादीन्युपपद्यन्त इति ।
अपरे तु घटादिविनाशे सति निवृत्तपूर्वरूपैरुत्पन्नरूपा-
न्तरैश्च परमाणुभिर्द्व्यणुकादिक्रमेण घटा... ।

Subject: Tārkikarakṣāsārasaṅgrahavyākhyā.

Remarks:—The Ms. is in a fairly good condition. There are two sheets at the end dealing with the text.

॥ तर्कामृतम् ॥

6526. TARKĀMṚTAM.

Burnell's Catalogue No. 2287. Page 122. Right column. Substance—Paper. Size—14×6 inches. Sheets—7. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Jagadīśa. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ।
श्रीगुरुभ्यो नमः ॥

ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहाः सदाभीष्टदाः
स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते ॥ १ ॥

अथ श्रुतिः श्रूयते 'आत्मा वारे द्रष्टव्यः श्रोतव्यो म-
न्तव्यो निदिध्यासितव्य' इति । अस्यार्थः मुमुक्षुणा आ-
त्मा द्रष्टव्यः । मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् ।

आत्मदर्शनोपायः क इत्यत आह श्रोतव्य इत्यादि ।
सामान्यतः पदार्थो द्विविधः । भावोऽभावश्च भावः ष-
ड्विधः । द्रव्यगुणकर्मसामान्य विशेष समवाय भेदात् ।

End:

एवं नञोऽर्थोऽभावः । अघटो भूतलमित्यादौ घटाभिन्ने
लक्षणा । न कलञ्जं भक्षयेदित्यादौ बलवदनिष्टजनकत्वे
लक्षणा । क्रियासङ्गतैवकारस्यात्यन्ताव्यवच्छेदोऽर्थः । यथा
नीलं सरोजं भवत्येव । विशेषणसंगतस्यायोगव्यवच्छेदः
यथा शङ्खः पाण्डर एव । विशेष्यसंगतस्यान्ययोगव्यव-
च्छेदः यथा पार्थ एव धनुर्धर इत्यादौ । एवंदिशा सर्वत्र
बोध्यम् ।

Colophon:

इति श्रीजगदीशभट्टाचार्यविरचितं तर्कामृतं समाप्तम् ।

Subject: Tarkāmṛta.

Remarks :—The Ms. is in a fairly good condition. On the title page is given

श्रीशरभेन्द्रभूपतिनार्जितम्

The author of this manual on Tarka is the same as the famous Jagadīśa—the commentator of Dīdhiti. vide. No. 6148.

This work has been published by Rājendranāth Ghosha with Bengāli introduction and Translation in 'the Nyāyapraveśa' a collection of works of the Navya Nyāya. Part 1. 1919.

॥ तर्कामृतम् ॥

6527. TARKĀMṚTAM.

S. K. Collection No. 27.

Substance—Paper. Size—9 × 8¾ inches. Sheets—27. Lines—7-10 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Jagadīśa. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6526.

Remarks:—The Ms. is in a fairly good condition.

॥ तर्कामृतम् ॥

6528. TARKĀMṚTAM.

J. L. Collection No. 915. Substance—Paper. Size—9½ × 8½ inches. Sheets—14. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Jagadīśa. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6526.

Remarks:—The Ms. is in a fairly good condition.

॥ तर्कामृतम् ॥

6529. TARKĀMṚTAM.

Burnell's Catalogue No. 10917. Page 121. Right column. Substance—Palm leaf. Size—14 × 1¼ inches. Leaves—40. Lines—8 to a Page. Script—Grantha. No. of Granthas—800. Author—Jagadīśa. Incomplete. Wants beginning & end. Printed.

Beginning:

.. व्याप्तिज्ञानं करणम् । परामर्शोऽव्यापारः । अनुमितिः फलमिति मणिकृतः । अत्रोपाध्यायाः । पर्वतधूमवह्निव्याप्त्याकारकपरामर्शात् व्याप्तिविशेष्यक ··· अनुमितिस्तत्र व्याप्तिज्ञानं पूर्वं नेति तज्जन्यानुमितौ व्याप्तिज्ञानस्यकरणत्वं न संभवतीति व्यभिचारः ।

End:

तस्मात् प्रतिबध्यतावच्छेदकस्य दुर्निरूपत्वात् कथं तादृशनियमः । कथं वा वह्निव्याप्त्यवच्छेदकत्वप्रकारकधूमत्वज्ञाने तादृशनिबन्धनातिव्याप्तिरतो लक्षणं निर्दुष्टमिति वदन्ति । अस्मिन् पक्षे दूषणभूषणविचारो ग्रन्थविस्तरभियोपेक्ष्यते ॥

Subject: Tarkāmṛta.

Remarks:— The Ms. is in a fairly good condition.

Dr. Burnell has left this Ms. as an unidentified fragment.

॥ तर्कामृतव्याख्याचषकः ॥

6530. TARKĀMṚTAVYĀKHYĀ—CAṢAKAḤ.

Burnell's Catalogue No. 2288. Page 122. Left column. Substance—Paper. Size—14 × 6 inches. Sheets—84. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Gaṅgārāma. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

श्रीगुरुभ्यो नमः ॥

आत्मरूपगुणनृत्यकारिणे लोचनाकलित तत्त्वसाक्षिणे ।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः ॥ १ ॥

गुरुगणना यत्पूर्वं यस्याग्रे स प्रहाग्रणीतनयः ।
कविमिव तं कवयन्तं तातं नारायणं वन्दे ॥ २ ॥

मुक्तावलीप्रकाशात्स्फुरिते चषकं समर्पितं सुधिया ।
[illegible] मया पिबन्तु तर्कामृतं सुधियः ॥ ३ ॥

यद्यप्यविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे विशेषतः फलजिज्ञासायां दृष्टसंभवे

  

विघ्नोपशान्तये कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् श्रोत्रवधानाय चिकीर्षितं प्रतिजानीते ॥ अथाख्या इति ॥ मया तर्कामृतं तर्का द्रव्यादयः पदार्थास्त एवामृतं मुक्त्युपायत्वात्तन्यते । लक्षणप्रतिपादनेन बुद्ध्युपारूढं क्रियते ।

End :

परन्तु फलव्यापारविषयकत्वयोः परस्परमवच्छेद्यावच्छेदकभावावगाही यो बोधस्तद्विषयकेच्छा तथा वाच्येति फलव्यापारयोरपि परस्परमवच्छेद्यावच्छेदकाभावावगाह्येव धातोर्बोधो भवेदिति न पुष्पवन्तादिपदादिवात्रापि पदव्यापारयोर्विमृंखलयोर्बोधः * *

कर्मव्यतिहारे द्विर्भावस्य बलादिति सुन्दोपसुन्दनिष्ठप्राण-

वियोगानुकूला तथाधिकरणा च या क्रिया तदनुकूलकृति मन्तौ ताविति सुन्दोपसुन्दावन्योन्यं जघ्नतुरिति वाक्यार्थी- नो बोध इति विशेषो यद्यपि बहुवक्तव्यस्तथापि विस्तर- भिया विरम्यते ॥

Colophon:

चषकसुवर्णस्पर्शं दिनकरकरकृतपरामर्शम् ।
जगदीशमथनकल्पं पिबन्तु तर्कामृतं तदाकल्पम् ॥

सूत्रं स्वयं न वलितं मणिर्नघटितस्तथापि चास्माकम् ।
मालाकाराणामिव ममता ग्रन्थे स्वकीयकौशल्यात् ॥

श्रीः । जट्झुपनामकगंगारामविरचितस्तर्कामृतचषकः संपूर्णः । श्रीः
श्रीकृष्णार्पणमस्तु श्रीपार्वतीपरमेश्वरौ विजयेताम् ।

मद्रुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्याद्लसपुरुषानादरभरैः ।
यथा यूनस्तद्वत्परमरमणीयापि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ॥

Subject: Tarkāmṛtavyākhya—caṣaka.

Remarks:—The Ms. is in a fairly good condition.

Gaṅgārāmajhaṭi has commented upon the Tarkāmṛta of Jagadīśa and it is called Caṣaka. This author is identical with the author of the commentaries bearing his name on the Tarkasaṅgraha and Muktāvali published by the Bālamanoramā Press, Mylapore.

॥ तर्कामृतव्याख्या—चषकः ॥

6531. TARKĀMṚTAVYĀKHYĀ—CAṢAKAḤ.

N. S. Collection No. 25. Page 118. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—126. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—4675. Author—Gaṅgārāma Complete. Printed.

Beginning, end and subject—Same as No. 6530.

Colophon:

चषक + तद्याकल्पम् ॥

सूत्रं + कौशल्यात्

इति श्रीजटच्युपनामकगङ्गारामविरचितस्तर्कचषकः संपूर्णः संवत् १८१९ समये नाम पुष्यसुदि १२ लिखितो रमणकायस्थः

(मदुक्ति + कुरुते ॥)

Remarks:—The Ms. is in a fairly good condition. This Ms. is dated saṃvat 1819 or A.D. 1763

॥ न्यायकुसुमाञ्जलिः—सव्याख्या ॥

6532. NYĀYAKUSUMĀÑJALIḤ—SAVYĀKHYĀ.

Burnell's Catalogue No. 2275. Page 123. Right column. Substance—Paper. Size—9½ × 4 inches. Sheets—54.

Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Udayana and Jayarāma. Text alone. Complete. Printed.

Beginning;

नत्वेशं जयरामोऽसौ न्यायपञ्चाननः कृती ।
विवृणोति बुधप्रीत्यै कुसुमाञ्जलिकारिकाः ॥

विघ्नध्वंसाय विहितं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतोऽपि मङ्गलायैव निबध्नन् प्रयोजनाभिधेयसंबन्धग्रन्थनामान्याह—

सत्पक्षप्रसरस्सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैव निवेशितः पदयुगे भृंगायमाणं भ्रम-
चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥

एष न्यायप्रसूनाञ्जलिः मे चेतोऽविघ्नं यथा स्यात्तथा रमयतु

End:

कुसुमाञ्जलिकारिकाः समस्ताः
विवृताः श्रीजयरामतान्त्रिकेण ।
कुसुमाञ्जलिमञ्जसाधिगच्छेत्
यदि गच्छेदिह हेलयापि चित्तम् ॥

कर्तृत्वेन घटादिवज्जनिमतां संगीतकीर्त्याकरं
वक्तृत्वेन पुराणवच्च [illegible] निर्दूषणम् ।

मीमांसामतदुर्गमेषु पिहितप्रायं प्रभावालयं
यद्विघ्नः कलयाम्बभूव तदियं साऽद्दृष्टिकी कल्पना ॥

Colophon: Nil.

Subject: Nyāyakusumāñjali & its Vyākhyā by Jayarāma.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

उमापतिपण्डितानाम् ।

This book, Nyāyakusumāñjali or Īśvarakusumañjali, is Udayanācārya's magnum opus. It contains, in its five chapters, the Nyāya proofs for the existence of God.

Udayana was the first Nyāya writer to give a definite theistic turn to the Nyāya philosophy.

This Ms. as also the following one, contain, besides Udayana's work, the work of Jayarāma Nyāya Pancānana also, which is a commentary on Udayana's work. Jayarāma refers, quotes and criticises the views of another commentator on Udayana, viz, Vardhamāna. Jayarāma, comments only on the kārikās of Udayana. Udayana's own explanatory prose text is left out.

The complete text of the kusumañjali has been published by the Chowkhāmba depot of Benares, but the commentary has not been published so far.

॥ न्यायकुसुमाञ्जलिः—सव्याख्या ॥

6533. NYĀYAKUSUMAÑJALIḤ SAVYĀKHYĀ.

Ms. Not noticed by Burnell. No. 15568. Substance—Paper.

Size—14×6 inches, Sheets—7. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—198. Author—Udayana-author of the text and Jayarāma, of the commentary. Incomplete. commentary. Not printed.

Beginning—Same as No. 6532.

End :

ननु दण्डादिर्घटादिहेतुरस्तु । ननु यागादिः स्वर्गादिहेतुः । अत्राह—

'विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा ।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥'

विश्वेषां प्रेक्षावतां यागादौ प्रवृत्तिः न विफला, प्रेक्षावत्प्रवृत्तित्वात् । न वा दुःखैकफला । नन्वस्तु दृष्टलाभ(पू)जाख्यातिफले इत्याह— दृष्टेति । लाभादिनिरपेक्षै पितिर्जतारण्ये तदावराणात्(?)...॥

Colophon: Nil.

Subject: Udayana's Kusumañjali with Jayarāma's Vyākhya, available only up to the commentary on the first eight Kārikas of the first stabaka.

Remarks:—The Ms. is in an excellent condition.

॥ न्यायकुसुमाञ्जलिकारिका—व्याख्या ॥

6534. NYĀYAKUSUMĀÑJALIKĀRIKĀ—VYĀKHYĀ.

Burnell's Catalogue No. 6370. Page 128, Left column.

Substance—Paper. Size—10×4⅞ inches. Sheets—24. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Haridāsabhaṭṭācārya. Incomplete. Wants a little in the beginning. Printed.

Beginning:

...दसिद्धावपि अनुमित्सया अनुमितिः न संशयासत्त्वं दोषाय तुष्यत्विति न्यायेन संशयमाह "तदिहेत्यादि-धर्माधर्मात्मकालौकिकपरलोकसाधनविप्रतिपन्नं प्रति त-त्साधने' सिद्धे च तस्मिंस्तदधिष्ठातृतयेश्वरः साधनीयः अचेतनस्य चेतनाधिष्ठानेनैव कार्यजनकत्वात् तत्साधन-माह—

"सापेक्षत्वादनादित्वात् वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेः अस्ति हेतुरलौकिकः॥"

End:

संतृप्यत इति न तृप्तीभवति

"इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्रीः
यद्वासयेदपि च दक्षिणवामकौ द्वौ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पितेन॥'

नो वासयेच्चतः किमास्माकं॥

Colophon:

इति श्रीमहामहोपाध्याय श्रीमन्न्यायालङ्कारहरिदासभ-ट्टाचार्यकृता कुसुमाञ्जलिकारिकाव्याख्या समाप्ता॥

Subject: Kusumāñjalikārikāvyākhyā.

Remarks:—The Ms. is in a fairly good condition.

This Ms. represents the Kārikās of Udayana's Kusumāñjali with a commentary thereon. The commentary is by one Nyāyālaṅkāra Haridāsa Bhaṭṭācārya. The work has been published by the Chowkhamba Book Depot, Benares.

॥ न्यायकुसुमाञ्जलिव्याख्या ॥

6535. NYĀYAKUSUMĀÑJALIVYĀKHYĀ.

Burnell's Catalogue No. 10915. Page 128. Right column. Substance—Palm leaf. Size—17 × 1¾ inches. Leaves—198 (2-199). Lines—7 to a Page. Script—Grantha. No. of Granthas—5540. Author—Varadarāja. Incomplete. Wants a very small portion in the beginning. Printed.

Beginning:

....मित्यर्थः अपश्च क्वचिदतत्वमेव तत्त्वतया...वश्यं मदीयं चेतो रमयतु । ....संशयविपर्ययनिरसनेन तत्त्वास्पदं करोत्विति । अनघमिति व्यस्तपाठे विशेषणं स्वारसिकः .... निष्पापं चेत इति । पार्जितप्रसूनाञ्जलिः न्यायप्रसूनाञ्जलिरिति ।

End:

तदेवं परमेश्वरविषयस्य न्यायस्य श्रवणानन्तरं प्राप्तस्य तन्निदिध्यासनपर्यायतद्भावनादिद्वारेणापवर्गफलस्य

नास्तिकादीन् प्रति निदिध्यासनाजनकत्वेन अपवर्गप्रद-त्वबुद्धिर्माभूदिति हृदि निधाय सर्वेश्वरं प्रार्थयते— "इ-त्येव"मिति। स्तुतिर्वेदः नीतिर्न्यायः तयोस्संप्लव एकस्मि-न्नीश्वराख्ये विषये प्रवृत्तिः स एव जलानि भूयोभिः कुतर्कनिबन्धनपर्यायापनोदनैः प्रक्षालितेऽपि येषां हृदये न पदमादधासि शैलसंकाशाः त्वामेवैकं विषयीकृत्य प्रवर्त-मानाभिरपि भूयश्श्रुतिभिरापातन्यायैश्च येषां हृदयं तद्भा-वनायोग्यामवस्थां प्रापयितुं न शक्यते ते त्वात्मानः। ए-तदुक्तं भवति न्यायं श्रुतिन्यायो दोषः पुरुषाणामिति किंतु हे कारुणिक! सांसारिकदुःखार्तानुद्दिधीर्षुणा त्वयै-वैतत्क्रियतामित्याह— प्रस्तुताभ्यां श्रुतिनीतिभ्यां विप्र-तिबुद्धयोऽपि ते नराः भो......कारुणिक! कृपया हेतुभू-तया तेषामापत्काले उच्चैरतिशयेन भवच्चिन्तकास्त्वयैव भा-वनीयाः।

Colophon: (Leaf No. 133)

इति श्रीमद्रामदेवमिश्रसूनोः वरदराजस्य कृतौ न्यायकुसुमाञ्ज-लिटीकायां तृतीयः परिच्छेदः

Subject: Nyāyakusumāñjalivyākhyā. Stabakas one to five.

Remarks :—The Ms. is in a fairly good condition.

The famous Varadarāja, the author of Tārkikarakṣā—who lived in the middle of the 11th century A. D. has written this commentary on Udayana's Kusumāñjali. He is the author of a commentary on Udayana's Kiraṇāvalī also. Varadarāja

is a great admirer of Udayanācārya.

This Ms. representing Varadarāja's commentary on the Kusumāñjali is almost complete, except for a very little portion in the beginning. The Ms. begins with the commentary on the last line of the maṅgalaśloka and runs up to the end. The work has been published in the Sarasvati Bhavan studies, Allahabad.

॥ न्यायकुसुमाञ्जलिव्याख्या ॥

6536. NYĀYAKUSUMĀÑJALIVYĀKHYĀ.

Burnell's Catalogue No. 10918. Page 123. Right column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—170. Lines—5-7 to a Page. Script—Grantha. No. of Granthas—5640. Author—Varadarāja. Incomplete. Printed.

End and subject:—Same as No. 6535.

Colophon: Nil.

Remarks:—The Ms. is in a very decaying condition.

This is the original of the previous Ms. We have lost some forty leaves in the beginning and some lines in the end.

॥ न्यायकुसुमाञ्जलिप्रकाशः ॥

6537. NYĀYAKUSUMĀÑJALIPRAKĀŚAḤ.

J. L. Collection No. 916.

Substance—Paper. Size—$9\frac{1}{4} \times 4$ inches. Sheets—181

(4-184). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3660. Author—Vardhamāna. Incomplete. Wants a litte in the beginning; runs up to the end of the 3rd Stabaka. Printed.

Beginning:

....र्भोगे वा तद्धेतुना पुनः कर्मान्तरजननात्काशेषविशेषगुणोच्छेदो मोक्षः । नागीश्वरे प्रमाणव्युत्पादनस्य मोक्षहेतुत्वे मानमिति तन्निष्फलं । किंच ईश्वरमननस्य मोक्षहेतुत्वे मानाभावः ।

End:

ननु सन्तस्ते सत्तामात्रेण असन्तश्च स्वज्ञानसत्तया तां जनयतीति नोक्तदोष इत्याह न चैतस्यामिति । विशेषणाविशेष्यभावानुपपत्तिं तत्र मानमाह नन्विति । विशेषणेन विशेष्ये वि....

Colophon: (Sheet No. 183)

इति श्रीमहामहोपाध्याय श्रीवर्धमानविरचिते न्यायकुसुमाञ्जलिप्रकाशे तृतीयः स्तबकः समाप्तिमगमत् ।

Subject: Nyāyakusumāñjalivyākhyā otherwise known as Nyāyakusumāñjaliprakāśā. The text wants three paragraphs in the beginning and is available completely up to the end of the 3rd stabaka and a little portion at the beginning of the 4th stabaka is available on the last 2 sheets.

Remarks:—The Ms. is in a fairly good condition. On the face-sheet is given—

इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ॥

Vardhamāna, the author of this commentary, Prakāśa, on Udayana, unlike Jayarāma and Haridāsa Bhaṭṭācārya, follows Varadarāja and comments on the Kārikās as well as the prose portions of Udayana. He is the son of the famous Gaṅgeśa Upādhyāya and has commented on many great works in Nyāya. This work has been published by the Chowkhamba Book Depot, Benares.

॥ न्यायकौमुदी ॥

6538. NYĀYAKAUMUDĪ.

Burnell's Catalogue No. 2301. Page 128. Left column. Substance—Paper. Size—$11\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—29. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—870. Author—Veṅkatarāma. Incomplete. Wants end. Not printed.

Beginning:

नत्वा कैवल्यदं ब्रह्म स्मृत्वा गुरुवचोऽनिशम् ।
सुधीर्वेङ्कटरामोऽद्य तनोति न्यायकौमुदीम् ॥

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः। यद्यपि विभागवाक्यस्य न्यूनाधिकसङ्ख्या व्यवच्छेदार्थतया विभागादेव सप्तसङ्ख्याकत्वे सिद्धे सप्तेत्युक्तिर्निष्फला, तथापि सप्तग्रहणस्य स्पष्टार्थतया न दोषः ॥

End:

सङ्करश्च परस्पराभावसमानाधिकरणयोर्धर्मयो एकत्र समावेशः । अत्र परस्पराभावसमानाधिकरणयोरित्यनेन

स्वाभाववद्वृत्तिधर्माभाववद्वृत्तित्वम् स्वस्य लभ्यते । एकत्र समावेश इत्यनेन सामानाधिकरण्यं लभ्यते तथा च स्वाभाववद्वृत्तिस्वसमानाधिकरणधर्माभाववद्वृत्तित्वं स्वनिष्ठसङ्करत्वमिति फलितम् ॥

Subject: Nyāyakaumudī up to Sāṅkaryalakṣaṇa.

Remarks:— The Ms. is in a fairly good condition.

The Nyāyakaumudī of Veṅkaṭarāma deals with the general principles of the Nyāya system. The author seems to have been a South Indian Brahman probably of the 17th or the 18th century A. D.

॥ न्यायकौस्तुभः ॥

6539. NYĀYAKAUSTUBHAḤ.

S. S. Collection No. 58.

Substance—Paper. Size—12 × 4½ inches. Sheets—178. Lines—11 to a Page. Script—Devanāgari. No. of Granthas —8500. Author—Mahādevapaṇḍita. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

नत्वा साम्बशिवं मधुं(मुकु)दपितरं श्रीकण्ठसंज्ञं गुरुं
भूयः सूक्ष्मधिया विभाव्य च तदुक्तार्थं समस्तं हृदि ।
शब्दे मानवर विशिष्टविविधव्युत्पत्तिसंपादके
गूढार्थप्रतिपत्तये वरधियां कुर्वे प्रबन्धं वरम् ॥ १ ॥

अथ शब्दो निरूप्यते । अत्रोपजीव्योपजीवकभावसंग-

स्योपमाननिरूपणानन्तरं शब्दनिरूपणमिति बहवो वद-
न्ति । तत्र यद्यपि ज्ञायमानशब्दस्य शाब्दबोधकरणाभावा-
दिप्राचीनमते स्वरूपतस्तस्यासंभवः । उपमानस्य शब्दा-
नुपजीव्यत्वात् । तथापि फलद्वारकः स संभवत्येव शाब्द-
बोधे शक्तिग्रहस्य तत्र चोपमानस्य हेतुतया शक्तिग्रहद्वारा
शाब्दबोधे उपमानस्योपजीव्यत्वात् ॥

End:

प्रमाणशब्दस्य नियतवचनत्वेनानियतवचनस्थले स-
मानवचनत्वस्य नियामकत्वोपगमेप्यतिरस्कारादिति चेन्न।
यत्र विशेषवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरु-
द्धसंङ्ख्यामानविवक्षा तत्राभेदान्वये............ ......

अवश्यं सुधीभिस्तदालोचनीयं
प्रमादाद्दुरुक्तं हि संशोधनीयम् ॥ २ ॥

यथा श्रुतानां मणिगोचराणां
निष्कर्षबोधाय(सुयु)क्तियुक्तः ।
अयं महादेवबुधेन यत्ना-
च्छम्भोर्दयातो रचितो निबन्धः ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण श्रीमन्मुकुन्दपण्डि-
तात्मजपुणतामकरोपनामक महादेवपण्डितविरचिते न्याय-
कौस्तुभे शब्दपरिच्छेदः समाप्तः ॥ संवत् १८१९ मि ॥
कारकवदि ॥ ३ ॥ हे पोथि शमाप्रभइ ॥

श्रीरामचन्द्र । श्रीदेविजि शहाए ॥

Subject: Nyāyakaustubha.

Remarks; The Ms. is in a decaying condition. The date of the Ms. is samvat 1839. (i.e.) 1782 A. D.

Mahādeva Puṇtamkar, a native and resident of Poona is the author of this work on Nyāya—called Nyāyakaustubha. This particular work is intended to be a disquisition on the nature of Śabda and Śābdaprāmāṇya. But the colophon makes one conclude that the work is a complete manual on Nyāya—Vaiśeṣika.

Mahādeva seems to have lived about the end of the 17th century.

॥ न्यायरत्नम् ॥

6540. NYĀYARATNAM.

Burnell's Catalogue No. 10961. Page 121. Right column. Substance—Palm leaf. Size—16 × 1¾ inches. Leaves—67. Lines—5 to a Page. Script—Telugu. No. of Granthas—1005. Author—Maṇikaṇṭha. Complete. Not printed.

Beginning:

न्यायरत्नप्रसादेन तमःप्रशमहेतुना ।
हस्तामलकवत्प्राज्ञः सर्वं जानीत सम्प्रति ॥

अनुमानविदा नव्यव्याप्तिज्ञानस्य कारणम् ।
आदौ तर्कं निरूप्येह पश्चादन्यन्निरूप्यते ॥

तथा हि । किमनुमितौ तर्कस्साक्षात्करणमन्यथा वा कारणम् । तत्र लिङ्गपरामर्शः करणमनुमितौ । तच्च व्यापारवद्भवति । व्यापारस्य चान्यथानुपपत्त्या तर्क एव तद्व्यापार इत्यनुमितौ तर्कस्य साक्षात्कारणत्वमिति वदन्ति ।

End:

पर्वतातिरिक्तान्यवह्निमद्वृत्तिधर्मशून्यप्रमेयत्वादिति

दशावतारादनुमानखण्डनं

करोति वैकुण्ठधियं स्वपक्षगः ।

दशावतारादनुमानखण्डनं

करोति वैकुण्ठधियं स्वपक्षगः ॥

तद्विस्तरस्तु प्रकरणान्तरादनुसन्धेयम् ।

Colophon:

इति श्रीमणिकण्ठेन .... सतां कर्णभूषणम् ।

सत्प्रकाशचमत्कार्यकारि.. मनोहरम् ॥

यद्विवेचनचातुर्यं यद्ग्रन्थप्रथनौचिती ।

तनोति मुनिमूर्धन्यः गौतम...कौतुकम् ॥

जानन्ति ... नैव बहवो परप्रयासं

ज्ञात्वापि हन्त कुटिला त्रिमतिं भजन्ते ।

ते केचिदेव भुवि कान्तमणिप्रभावा

येषां मनः पर........तामुपैति ॥

गुरुत्वादवगाहन्ते आशयस्तन्महाशयः

उ...स्वेन्ते तु... श्रित्वा दन्तः शून्यङ्गास्ततः।

तीरगुत्तीर्थमिश्रोक्तम्म... राजधर्माधिकारि

मणिकण्ठकृतन्यायरत्नंनाम प्रकरणं समाप्तम् ॥

श्रीगुरुभ्यो नमः ॥

Subject: Nyāyaratnam.

Remarks:—The Ms. is in fairly good condition.

Maṇikaṇṭha, the author of the Nyāyaratna—a work dealing with the philosophical tenets of Gautama—should be referred to the 18th century A. D. More about him is unknown at present. Dr. Burnell, has noted under 'Fragments that have not been identified', this and the following Ms.

॥ न्यायरत्नम् ॥

6541. NYĀYARATNAM.

Burnell's Catalogue No. 10962. Page 121. Right column. Substance—Palm leaf. Size—16¼ × 1¼ inches. Leaves—66. Lines—7 to a Page. Script—Grantha. No. of Granthas—1005. Author—Maṇikhaṇṭha. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 6540.

Remarks:—The Ms. is in decaying condition.

॥ न्यायलीलावती ॥

6542. NYĀYALĪLĀVATĪ.

Burnell's Catalogue No. 10968. Page 122. Right column. Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—93. Lines—4 to a Page. Script—Telugu. No. of Granthas—2200. Author—Śrīvallabha. Complete. Printed.

Beginning:

नाथः सृजत्यवति यो जगदेकपुत्र-

प्रीत्या ततः परमनिर्वृतिमादधाति ।

तस्मै नमः सहजदीर्घकृपानुबन्ध-

लब्धत्रितत्त्वतनवे पुरुषोत्तमाय ॥

द्रव्यं नाकुलमुद्ग्लोगुणगणाः कर्माधिकं श्लाघ्यते

जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।

संबन्धः सहजो गुणादिभिरयं यत्रास्तु सत्प्रीतये

सान्वीक्षा नयवेश्मकर्मकुशला श्रीन्यायलीलावती ॥

षडेव पदार्था इति नियमव्यवच्छेद्यं प्रतीतं न वा

End:

न च कर्माणि तथात्वम् । दूराद्दूरघनाघनोत्तरसं योग-

मात्रेण कर्मज्ञानात् । नाददर्शनात् । न च वेगस्यैकत्वे

कर्मसन्तप्तरूक्षः वेगसन्तानोपरमवदुपपत्तेः ।

Colophon:

इति श्रीन्यायाचार्यश्रीवल्लभविरचितायां न्यायलीलावत्यां प्रक्रियाप-

रिच्छेदस्तुरीयः लीलावत्यां ग्रन्थः समाप्तः ।

शुभमस्तु । श्रीविश्वनाथाय नमः

Subject: Nyāyalīlāvatī.

Remarks:—The Ms. is in a fairly good condition.

Śrī Vallabha, the author of the Nyāyalīlāvatī is later than Udayanācārya whom he mentions in his work and is earlier than the beginning of the 13th century. This independent work on Nyāya is based on and planned after Praśastapāda's Padārthadharmasaṃgraha. He is the holder of certain peculiar views. It is said that Praśastapāda had a commentator called Śrīvatsa and that the commentary of his was called Nyāyalīlāvatī. If the identity of Śrīvatsa and Śrīvallabhācārya is established, we have to take this work as the com-

mentary on the Bhāṣya of Praśastapāda.

This work has been printed in the Benares Sanskrit Series No. 151. It has also been published from Bombay in 1915.

॥ न्यायलीलावती ॥

6543. NYĀYALĪLĀVATĪ.

Burnell's Catalogue No. 12351 Page 122 Right column. Substance—Paper. Size—11½ × 3¼ inches. Sheets—144. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Śrīvallabha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6542.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायलीलावतीटीका—प्रकाशः ॥

6544. NYĀYALĪLĀVATĪṬĪKĀ—PRAKĀŚAḤ.

Burnell's Catalogue No. 12352. Page 123. Left column. Substance—Paper. Size—10 × 3¾ inches. Sheets—305. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—3900. Author—Vardhamāna. Incomplete. Wants end. Not printed.

Beginning:

एकत्र शूलमपरत्र बिसप्रसून-
मन्यत्र कृत्तिरपत्र च पीतवासः ।
त...वर्ष्मशशलक्ष्मकला किरीट-
निष्पिष्टकैटभहृदोऽस्तु मम वर्त्मसिद्ध्यै(?) ॥ २१ ॥

न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥ २ ॥

विशिष्टशिष्टाचारानुमितकर्तव्यताकविघ्नविघातकं नमस्कारं निबध्नाति नाथ इति ।

End:

ननु यत्र समवायो विशेषणं तत्र विशिष्टव्यवहारोऽस्ति । न च तत्र सम्बन्ध इत्यनैकान्तिकमित्याह । तत्क्षमानिति । तन्तुमत्त्वं तन्तुसमवायः । पूर्वमत्राबाधितत्वेन...

Subject; Lilāvatīprakāśa.

Remarks:—The Ms. is old and is in good condition. North Indian script.

This Vardhamāna is the same as Gaṅgeśa's son, the great commentator of many famous works on Nyāya.

॥ न्यायसिद्धान्ततत्त्वम् ॥

6545. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 10907b. Page 118. Right column. Substance—Palm leaf. Size—17¾ × 1½ inches. Leaevs—19. Lines—8 to a Page. Script—Grantha. No. of Granthas—480. Author—Śrīnivāsa. Incomplete. Wants end Not Printed.

Beginning:

यत्पादयुग्मसरसीरुहलग्नचित्तो
दैत्येन्द्रसूनुरितलङ्घितविघ्नजातः ।

जातस्तमिन्दुधवलं वरदं नतेभ्यो
देवाद्रिनेत्रममृतं नृहरिं भजामः ॥

श्रीमान्ध्रुवकाश्यपान्वयसुधाधारानिधौ चन्द्रमाः
नप्ताऽनन्तयदेशिकस्य तनयः श्रीश्रीनिवासस्य यः ।
ख्यातस्तर्कवितर्कसंशयमहामोहान्धकारच्छिदो
दक्षो यस्य विपक्षपक्षदृषदां टङ्कायमाना गिरः ॥

सि⋯ान्ताक्षेपलेखा सुरसरिमादिताकोचनाहीशबद्ध-
प्रज्ञामन्थाचलेन्द्रप्रमथनजनितादम्भसंक्षोभभाजः ।
तर्काकूपारमध्यादमृतमुदहरन्न्यायसिद्धान्ततत्त्वं
धीमान्स श्रीनिवासो विबुधगणमुदे तार्किकाणां वरिष्ठः ॥

पदार्थो द्विविधः । भावोऽभावश्चेति । भावः षड्विधः । द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । द्रव्यं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनो भेदान्नवैव । गुणोऽपि चतुर्विंशतिप्रकारः । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्व स्नेहशब्द-बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदात् । कर्म च पञ्चविधम् । उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् । सामान्यञ्च द्विविधम् । परमपरञ्च । परञ्च सर्वसामान्यव्यापकम् । तच्च सत्तारूपम् । अपरञ्च द्विविधम् । एकं सर्वसा....प्यम् । तच्च चैत्रीयत्वादि ।

End:

बहूनां रूपाणां चित्रप्रत्यक्षव्यवहारविषयत्वस्य तन्नि-
यामकत्वस्य च कल्पनमपेक्ष्य एकस्यैव चित्ररूपस्य तद्वि-
षयत्वं तन्नियामकत्वकल्पनाया लघुत्वात् । न चोदाहृत-
स्मरणाविरोधः । तस्य वर्णाभिन्नलौहित्यवान् मुखपुच्छा-
वच्छिन्नपाण्डुरवान् मुखविषाणावच्छिन्नयः स नीलो
वृष इत्यर्थात् । एतेन त्रिश्वेता सह्लकीत्यादिकं व्याख्या-
तम् । गन्धो रसश्च न चित्रः । न वा अव्याप्यवृत्तिः माना-
भावात् । ननु रसोऽव्याप्यवृत्तिः ।

Subject: Nyāyasiddhāntatattva also known as Nyāyasid-dhāntamañjarītattva.

Remarks:—The Ms. is in a fairly good condition.

The other work contained herein is

तर्कभाषाटीका तत्त्वप्रबोधिनी

There are eleven fragmentary leaves in the middle dealing with the same subject and also with Subhāṣita.

Dr. Burnell does not notice this work under this number.

Śrīnivāsa, the author of the Nyāyasiddhāntatattva, a short syncretic digest of Nyāyavaiśeṣika belonged to the Naidhruvakāśyapagotra and was the son of Ananta Deśika. Evidently he was a Śri Vaiṣṇava Brahmin of South India.

॥ न्यायसिद्धान्ततत्त्वम् ॥

6546. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 10969 Page 121. Left column.

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves

—47. Lines—7 to a Page. Script—Telugu. No. of Granthas—1300. Author—Śrīnivāsa. Complete. Not printed.

Beginning—Same as No. 6545.

End:

स्पन्दः समानं सामान्यं विशेषः समवायकः ।
अभावः सप्रपञ्चश्च निरुपाधिर्निरङ्कुशः ॥

Colophon:

इति श्रीनिवासविरचिते न्यायसिद्धान्ततत्त्वं संपूर्णम् ।

श्रीरघुपतये नमः ।

Subject: Siddhāntatattvam.

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell notices this Ms. on p. 121 as an unidentified fragment.

॥ न्यायसिद्धान्ततत्त्वं ॥

6547. NYĀYASIDDHĀNTATATTVAM.

Burnell's Catalogue No. 2273. Page 122. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—35. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Śrīnivāsa. Incomplete. Wants end. Not printed.

Beginning—Same as No. 6545.

End:

अन्यथा तथाविधानां तादृशात्यन्ताभावानां तत्सम्ब-

न्धानाञ्च तदुत्पत्तिविनाशानां तत्कार्यकारणभावानां तत्प्रतियोगिकतदनुयोगिकभेदानाञ्च कल्पने गौरवात्।

भवानीशङ्करार्पणमस्तु ॥

Subject: Nyāyasiddhāntatattva.

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसारः ॥

6548. NYĀYASĀRAḤ.

J. L. Collection No. 917. Substance—Paper. Size—8¼ × 4 inches. Sheets—198. Lines—10-12 to a Page. Script—Devanāgarī. No. of Granthas—4250. Author—Mādhavadeva. Complete. Printed.

Beginning:

नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधम्।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेऽधुना ॥

यद्यप्यभिमतकर्मारम्भपूर्वसमये सर्वेऽपि शिष्टाः मङ्गलमाचरन्ति । तस्य च न समाप्तिः फलम्। कृतेऽपि मङ्गले असमाप्तेः। अकृतेऽपि समाप्तेश्च । नापि विघ्नध्वंसः प्रमाभावात्।

End:

यथा दशनिरूपितमेकं धनस्वत्वमिति केचित् प्रमाणप्रमेयादीनामत्रैवान्तर्भावात्। शक्तिसादृश्यादीनामतिरिक्तत्वनिरासाच्च सप्तैव पदार्थाः।

Colophon:

इति श्रीमाधवदेवविरचितो न्यायसारः समाप्तिमगमत् ॥
विश्वनाथेन लिखितं भास्करार्थं परार्थञ्चेति लेखकपाठकयोः शुभं भवतु ॥

Subject: Nyāyasāra.

Remarks :—The Ms. is in a fairly good condition.

This Ms. originally belonged to the famous Gambhīrarāya-bhāratī Dīkṣita and later went into the possession of Bhaṭṭa-Gosvāmin.

Nothing is known of the author of this Nyāya manual, Nyāyasāra, except that his name is Mādhvadeva and that of his guru is Lakṣmaṇa. He seems to have been called Mahādeva also and Lakṣmaṇa, his guru, seems to have been his father also. The work has been published in "the Pandit" New series—Vols. XXV., XXVI. It has also appeared therefrom, as a reprint.

॥ न्यायसिद्धान्तदीपः ॥

6549. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10932. Page 119. Right column. Substance—Palm leaf. Size —$19\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—77. Lines—8 to a Page. Script—Grantha. No. of Granthas—2464. Author—Śaśadharaśarman. Complete. Printed.

Beginning:

ध्वंसितपरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरशर्मा प्रकाशयति ॥

धारणीयः प्रयत्नेन सचर्कस्नेहसुप्रभः ।
न्यायसिद्धान्तदीपोऽयं कथासु विजिगीषुभिः ॥

इह तावदभीष्टकर्मणो निर्विघ्नेन परिसमाप्तिमुद्दिश्य बहुशः प्रवर्तमाना विनायकार्चनदधिदूर्वादौ मङ्गले दृश्यन्ते । ते प्रेक्षावन्तः तत्र मङ्गलस्य तद्विशेषस्य वा नमस्कारस्य दुरिताद्युत्सारणद्वारा अभीष्टसमाप्तिंप्रति कथमुपायत्वं ग्राह्यम् ।

End:

तस्मात् भ्रममूलकतया व्युत्पत्तिग्रहो न समीचीन एव स्यादित्याद्युत्पत्तिग्रहस्य भ्रममूलकत्वेऽप्यप्रसमीचीनत्वोपरक्ते....स तपोऽतप्यत इत्यादिश्रुतेरणिमादिप्रतिपादकश्रुतेश्च धर्माधर्मनित्यत्वज्ञानादिकमपि ईश्वरेऽङ्गीकुर्वन्तीति सर्वमवदातम् ।

Colophon:

इति महोपाध्याय शशधरविरचितानि प्रकारणानि समाप्तानि

शुभमस्तु । गुरुभ्यो नमः ॥

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in good condition.

Mahopādhyāya Śaśadharaśarman was a native of Mithilā. He quotes Udayanācārya and his Vyāptilakṣaṇa is quoted by Gaṅgeśopādhyāya. He seems to have been the contemporary of one Maṇidhara. He must have lived about 1125 A. D. He has written besides this work, Nyāyanaya or Nyāyamīmāṃsāprakaraṇa and Śaśadharamālā.

This work, Nyāyasiddhāntadīpa, with the prabhā of Śeṣānanta has appeared in 'the Pandit'—New series. Vols. XXV XLII.

॥ न्यायसिद्धान्तदीपः ॥

6550. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10935. Page 119. Right column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—81. Lines—7 to a Page. Script—Grantha. No. of Granthas—650. Author—Śaśadhara. Incomplete. Wants end. Printed.

Beginning—Same as No. 6549.

End:

नवैवमुपाधिग्रहादूषिकैव न स्यादिति वाच्यम् । वि-
शेषोपस्थित...उपाधित्व....णात् । यत्तु विकल्प्य दूषणं
कृतं तद्दूषणमेव । यावत्साध्यव्यापकस्याप्य....

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in a fairly good condition. There is a loose leaf at the beginning dealing with the same subject.

॥ न्यायसिद्धान्तदीपः ॥

6551. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10934. Page 119. Right column. Substance—Palm leaf. Size—14 × 1½ inches. Leaves—25. Lines—8 to a Page. Script—Grantha. No. of Gran-

thas—600. Author—Śaśadharaśarman. Incomplete. Wants end. Printed.

Beginning—Same as No. 6549.

End:

एवंविधदुःखध्वंसपरत्वे लक्षणा प्रसङ्गादित्याहुरिति संक्षेपः

Colophon: इत्यपवर्गवादः १० ॥

Subject: Nyāyasiddhāntadīpa.

		leaves.
1	मङ्गलवादः	1—3
2	अन्धकारवादः	3—7
3	कारणतावादः	7—9
4	पदशक्तिप्रकरणम्	9—17
5	मनोऽणुत्ववादः	17—19
6	शब्दस्वातन्त्र्यवादः	19—20
7	अपवर्गवादः	20—30

Remarks:—The Ms. is in a fairly good condition.

॥ न्यायसिद्धान्तदीपः ॥

6552. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10935. Page 119. Right column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—40. Lines—5 to a Page. Script—Telugu. No. of Granthas—520. Author—Śaśadharaśarman. Incomplete. Printed.

Beginning:

इह तावदभीष्टकर्मणोनिर्विघ्नपरिसमाप्तिमुद्दिश्य

Same as No. 6550.

End:

कतिपयव्यक्तेः संनिकर्षे मानाद्यासंनिहितातीतानवग-
तव्यक्तिविषयकं ज्ञानं चक्षुरादि नात्र जन्यते । न च
चक्षुरादिनाऽसान्निकृष्टज्ञान जननेऽतिप्रसङ्गः ।

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in a decaying condition.

॥ न्यायसिद्धान्तदीपः ॥

6553. NYĀYASIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 10936. Page 119. Right column. **Substance**—Palm leaf. **Size**—16¾ × 1¾ inches. **Leaves**—89 (26-64). **Lines**—8 to a **Page**. Script—Grantha. **No. of Granthas**—1920. **Author**—Śaśadhara. Incomplete. Wants end. Printed.

Beginning—Same as No. 6550.

End:

भूतज्ञानं यदा तु तथाभूतो भ्रमो भवति तदा प्रवर्तेत
इति स्वर्गार्थे चिकीर्षाजन्यकृतित्वेन रूपेण यत्कृति
साध्यं तज्ज्ञानस्य प्रवर्तकत्वमिति पूर्वपक्षसंक्षेपः । अत्रो-
च्यते.... ।

Subject: Nyāyasiddhāntadīpa.

Remarks:—The Ms. is in good condition.

॥ न्यायसिद्धान्तदीपव्याख्या ॥

6554. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ.

Burnell's Catalogue No. 10937. Page 119. Right column.

Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—115. Lines—8 to a Page. Script—Grantha. No. of Granthas—4300. Bhiṣagrāja alias Śeṣānanta. Incomplete. Printed.

Beginning:

कल्याणाचलकोदण्डं कमलाकान्तसायकम्
कल्लोलमालितूणीरं कलये पुरशासनम् ॥

सङ्केतं प्राप्य राधारहितमथ हरिः शङ्कयागत्य दृष्ट्वा ।
तन्मूर्ध्नं द्वारि वृद्धान् निकटगृहवधूवेषधारी सशङ्काम् ।
तत्पत्स्वीकारभाषागतिहसितमुखैर्वञ्चयन्नेत्य गेहं
राधामालिङ्ग्य गाढं रतिमुदितमनाः श्रेयसे भूयसेऽस्तु ॥

अवलम्बे कृपालम्बमम्बां शैलोन्नतस्तनीम् ।
लम्बोदरञ्च स्कन्दञ्च कम्बुकुन्देन्दुसन्निभम् ॥

अपश्चिमादुदयते भिषग्राजा द्विपश्चिताम् ।
प्रभाविद्वच्चकोरेभ्यो व्याख्या ग्रन्थधरस्य तु ॥

न्यायसिद्धान्तदीपव्याख्या
शिक्षाप्रगल्भोक्तिभरो भिषग्राट् ।
व्याख्यां विशेषेक्षितपक्षिलाद्य-
पादप्रबन्धः कुरुते प्रभाख्याम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टेष्टदेवतानमस्कारं कृतं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते ॥ ध्वंसितेति ॥

End:

ननु बाधकाभावात्कथमभावत्वमित्याशङ्क्याह । तथात्व इति । तारत्वमन्दत्वे जात्युत्कर्षापकर्ष रूपत्वाज्जातित्वगकारादिप्रवृत्तित्वे... ।

Subject: Nyāya Siddhāntadīpavyākhyā—prabhā.

Remarks:—The Ms. is in a fairly good condition.

Bhiṣagrāja, who belonged to the family of Bhādarāyaṇa is the author of the Prabhā—a commentary on the Siddhāntadīpa of Śaśadharamiśra.

Though the name of the author is given as Bhiṣagrāja, the real name seems to have been Śeṣānanta. He is identical with the author of the commentary on Rucidattā's Prakāśa described under No. 6122 and of the work called Padārthacandrikā described under No. 5979.

This work has been published in the series 'The Pandit' of Benares. Vol. XXV-XLII.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6555. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10938a. Page 119. Right column. Substance—Palm leaf. Size—$14\frac{1}{2}\times1$ inches. Leaves—48. Lines—10 or 11 to a Page. Script—Grantha. No. of 595

Granthas—1290. Author—Bhiṣagrāja. Incomplete. Printed.

Beginning—Same as No. 6554.

End:

ननु महाजनानामेवं कामे कुर्यामिति सङ्कल्पोऽभिलाष-
पूर्वकयागादौ प्रवृत्त्यादिप्रमाणं । कस्मान्न निराक्रियत इ-
त्याशङ्कयाह । आस्तां विस्तर इति ॥

Colophon:

विधौ शशधरोदिते विविधमूढभावावृते
भिषक्नृपरिबृढाप्रभाविवरणेन विद्योदिते ।
विशुद्धविजयश्रियासुदृढमादरालिङ्गिता
निरूढपरिबन्धनो जगति गौतमीयाः कृताः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

(Leaf—म)

बादरायण + विपश्चिता ।
भूयोदर्शनवादोऽयं विस्तरेण प्रपञ्चितः ॥ १९ ॥

Subject: Nyāya Siddhāntadīpavyākhyā Prabhā.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is a copy of the same work.

॥ न्यायसिद्धान्तदीपव्याख्या—प्रभा ॥

6556. NYĀYASIDDHĀNTADĪPAVYĀKHYĀ—PRABHĀ.

Burnell's Catalogue No. 10938b. Page 119. Right column.

Substance—Palm leaf. Size—14½ × 1 inches. Leaves —100. Lines—10 to a Page. Script—Grantha. No. of Granthas—3000. Author—Bhiṣagrāja. Incomplete. Printed.

Beginning—Same as No. 6554.

End:

अनन्येति । अनन्यलभ्यः शब्दार्थः अन्वयसत्त्वाकाङ्क्षा-
दि लभ्य इति त्वया व्यवस्थापितत्वादित्यर्थः । वस्तुतो
